# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-7**

**(Grammatical Study and Linguistics)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Unit – I**

**(Marks : 35)**

1. यथेच्छ**मेकः** प्रश्नः समाधेयः। 10×1

(a) भट्टिकाव्यमाधारीकृत्य शरदः सौन्दर्यं समासेन वर्णयत।

(b) "दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।"–उक्तेरस्याः तात्पर्यं विवृणुत।

2. अधोलिखितयोः कस्यचित् **एकस्य संस्कृतभाषया देवनागरलिप्या** च सप्रसङ्गं व्याख्या कार्या। 7×1

(a) विम्बागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापहृतां पयोभिः।
कुलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः॥

(b) अदृक्षताम्भांसि नवोत्पलानि
रुतानि चाश्रौषत षट्पदानाम्।
आघ्रायि वान् गन्धवहः सुगन्ध–
स्तेनारविन्दव्यतिषङ्गवांश्च॥

3. अधोलिखितयोः कस्यचित् **एकस्य संस्कृतभाषया देवनागरलिप्या** च भावः सम्प्रसार्यताम्। 5×1

(a) न गुञ्जितं तन्न जहार यन्मनः।

(b) न मानिनी संसहतेऽन्यसङ्गमम्।

4. वङ्गभाषया आङ्गलभाषया वा अधस्तनयोः कस्य**चिदेकस्य** श्लोकस्य अनुवादः करणीयः। 5×1

(a) दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः।
आकर्णयन्नुत्सुकहंसनादान्
लक्ष्ये समाधिं न दधे मृगावित्॥

(b) तं यायजूकाः सह भिक्षुमुख्यै-
स्तपःकृशाः शान्त्युदकुम्भहस्ताः।
यायावराः पुष्पफलेन चान्ये
प्राणर्चुरर्च्या जगदर्चनीयम्॥

5. अधोलिखितेषु ***प्रश्नद्वयम्*** संक्षेपेण **संस्कृतभाषया देवनागरलिप्या** च समाधेयम्। 2×2

(a) किं खलु भट्टिकाव्यस्य अपरं नाम? अस्य काव्यस्य विरचने किमासीत् कवेरुद्देश्यम्?

(b) "मन्ये व्यतिस्ते ममापि धर्मः"– केन कं प्रति उक्तमिदम्?

(c) कति सर्गाः सन्ति भट्टिकाव्ये? अस्य द्वितीयसर्गस्य नाम किम्?

6. कयो***र्द्वयो***र्वा व्याकरणसम्मता टिप्पणी कार्या। 2×2

(a) हरिणं जिघांसुः

(b) यायजूकाः

(c) मृगावित्।

**Unit – II**

**(Marks : 40)**

7. यथेच्छ***मेकतरस्य*** उत्तरं देयम्।

(a) कर्मकारकविधायकं प्रधानं पाणिनिसूत्रं समुल्लिख्य तस्य दीक्षितमतानुसारेण व्याख्या कार्या। ततः कर्मणि षष्ठी-विभक्तिप्रयोगस्य सूत्रमेकं तथा कर्मणि सप्तमीविभक्तिप्रयोगस्य सूत्रमेकं च सोदाहरणं लेखनीयम्। 2+4+2+2

(b) अपादानकारकविधायकं प्रधानं पाणिनिसूत्रं सोदाहरणमुल्लिख्य दीक्षितवचनानुसारेण साधु व्याख्यायताम्। कर्मणि पञ्चमी-विभक्तिप्रयोगस्य सूत्रम् एकं तथा अधिकरणे पञ्चमी-विभक्तिप्रयोगस्य सूत्रम् एकं च सोदाहरणं लेखनीयम्। 2+4+2+2

8. यथाभिमतं सूत्र**मेकं** दीक्षितवचनानुसारेण **संस्कृतभाषया देवनागरलिप्या** च व्याख्येयम्। 6×1

(a) साधकतमं करणम्।

(b) स्पृहेरीप्सितः।

**9.** अधोनिर्दिष्टयोः कस्यच***नैकस्य*** आशयः स्पष्टीकरणीयः। 6×1

(a) अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः।

(b) विनापि तद्योगं तृतीया 'वृद्धो यूना'– इत्यादि निर्देशात्।

**10.** अधोदत्तयोः विषययोः यथाभिमतं ***एकस्य*** टीका कार्या। 4×1

(a) अकथितं कर्म।

(b) अपवर्गः।

**11.** अधोलिखितेषु ***त्रयाणाम्*** प्रशनानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च लेख्यम्। 2×3

(a) सम्प्रदानकारकविधायकं प्रधानं पाणिनिसूत्रं किम्?

(b) किं नाम कर्मप्रवचनीयम्?

(c) निर्धारणे का विभक्तिः भवति? उदाहरणमेकं लिख्यताम्।

(d) अधिकरणस्य किं लक्षणम्?

(e) अनादरे का विभक्तिः भवति? उदाहरणमेकं दीयताम्।

**12.** अधोरेखाङ्कितेषु पदेषु ***चतुर्णां*** कारकविभक्तिप्रयोगः सकारणं सूत्रोल्लेखपूर्वकं च निर्णेयः। (**संस्कृतभाषया देवनागरलिप्या** च) 2×4

(a) स्वदेशे पूज्यते राजा <u>विद्वान्</u> सर्वत्र पूज्यते।

(b) <u>पापे</u> अभिनिवेशः।

(c) शिष्यः <u>उपाध्यायात्</u> शास्त्रमधीते।

(d) <u>मुनित्रयं</u> नमस्कृत्य तदुक्तीः परिभाव्य च।

(e) <u>केशेषु</u> चमरीं हन्ति।

(f) स्फुटोपमं भूतिसितेन <u>शम्भुना</u>।

---